अयुग्यानमिव रैक्कमात्थेति अस्माद्धंसवाक्यादात्मनोऽनादरं श्रुतवतो जानश्रुतेः पौत्रायणस्य शुगुत्पेदे तामसौ रैक्कः शूद्रशब्देनानेन सूचयाम्बभूवात्मनः परोक्षज्ञानस्य ख्यापनायेति गम्यते, जातिशूद्रस्यानधिकारात्। कथं पुनः शूद्रशब्देन शुगुत्पन्ना सूच्यते इति, उच्यते, तदाद्रवणाच्छुचमभिदुद्राव शुचा वाभिदुद्रुवे शुचा वा रैक्कमभिदुद्रावेति शूद्रावयवार्थसम्भवात् रूढार्थस्य चासम्भवात्। दृश्यते चायमर्थोऽस्यामाख्यायिकायाम्"।

**शूद्रार्त्ता** स्त्री शूद्रेणार्त्ता पीड़िता। प्रियङ्गौ शब्दच०।

**शूद्रावेदिन्** स्त्री शूद्रां विन्दति विद–णिनि उप०। शूद्रजातिस्त्रिया विवाहकर्त्तरि। "शूद्रावेदी पतत्यत्रेः" मनुः "कामतस्तु प्रवृत्तानामिमाः स्युः क्रमशोऽवराः। शूद्रैव भार्य्या शूद्रस्य सा च स्वा च विशः स्मृते। ते च स्वा चैव राज्ञश्च ताश्च स्वा चाग्रजन्मनः" इति मनुना कामतश्चातुर्वर्ण्य विवाहे विहितेऽपि शूद्रावेदीत्यस्याधिकदोषार्थता द्विजातिस्त्रीलाभे शूद्रस्त्रीविवाहनिषेधार्थता च। स च विवाहः युगान्तरविषयः कलौ असवर्णस्त्रीविवाहनिषेधात् कलिशब्दे १८०२ पृ० दृश्यम्।

**शूद्रान्न** न० ६त०। शूद्रस्वामिकान्ने तस्य द्विजैरभक्ष्यत्वं यथा हारीतः "शूद्रान्नेन तु भुक्तेन उदरस्थेन यो मृतः। स वै खरत्वमुष्ट्रत्वं शूद्रत्वञ्चाधिगच्छति" भ०त० धृत वाक्यं शूद्रान्नं शूद्रस्वामिकान्नं रघु०। "आमं शूद्रस्य पक्वान्नं पक्वमुच्छिष्टमुच्यते" इति तत्पक्वान्नस्य सर्वथा निषेधादत्र आममेव शूद्रस्वामिकान्नं गृह्यते। तद्दत्तमपि भोजनकाले तद्गृहावस्थितं तदपि शूद्रान्नं तदाहाङ्गिराः "शूद्रवेश्मनि विप्रेण क्षीरं वा यदि वा दधि। निवृत्तेन न भोक्तव्यं शूद्रान्नं तदपि स्मृतम्" तेन शूद्रवेश्मस्थितक्षीरदध्यादिकमपि शूद्रान्नं पारिभाषिकमिति बोध्यम्। निवृत्तेन शूद्रान्नान्निवृत्तेन। तदपीति अपिशब्दात् साक्षाद्दत्तघृततण्डुलादि न तु तद्दत्तकपर्दकादिना क्रीतमपि। स्वगृहागते शूद्रान्ने अङ्गिराः "यथा यतस्ततो ह्यापः शुद्धिं यान्ति नदीं गताः। शूद्राद्विप्रगृहेष्वन्नं प्रविष्टन्तु सदा शुचि" प्रविष्टं स्वत्वापादकप्रतिग्रहादिनेति शेषः। अतएव पराशरः "तावद्भवति शूद्रान्नं यावन्न स्पृशति द्विजः। द्विजातिकरसंस्पृष्टं सर्वं तद्धविरुच्यते"। स्पृशति प्रतिगृह्णातीति कल्पतरुः। तच्च संप्रोक्ष्य ग्राह्यमित्याह विष्णुपु० "संप्रोक्ष्य प्रतिगृह्णीयाच्छूद्रान्नं गृहमागतम्" तच्च पात्रान्तरे ग्राह्यमित्याहाङ्गिराः "स्वपात्रे यत्तु विन्यस्तं शूद्रो यच्छति नित्यशः। पात्रान्तरगतं ग्राह्यं दुग्धं स्वगृहमागतम्"। एतेन स्वगृहमागतस्यैव शुद्धत्वं प्रतीयते ततश्चैतादृशमपि मुमुक्षुणा शूद्रान्नं सर्वथा न भोक्तव्यम् प्रागुक्तहारीतवचने तन्निन्दाश्रवणात्" शु०त०। "नाद्यात् शूद्रस्य विप्रोऽन्नं मोहाद्वा यदि वान्यतः। स शूद्रयोनिं व्रजति यस्तु भुङ्क्ते ह्यनापदि। षण्मासान् यो द्विजो भुङ्क्ते शूद्रस्यान्नं विगर्हितम्। जीवन्नेव भवेत् शूद्रो मृतः श्वा चाभिजायते। ब्राह्मणक्षत्रियविशां शूद्रस्य च मनीषिणः। यस्यान्नेनोदरस्थेन मृतस्तद्योनिमाप्नुयात्" व्यासवाक्यम् "आर्त्विजः कुलमित्रञ्च गोपालो दासनापितौ। एते शूद्रेषु भोज्यान्ना यश्चात्मानं निवेदयेत्। कृषीवलः कुम्भकारः क्षेत्रकर्षक एव च। एते शूद्रेषु भोज्यान्ना दत्त्वा स्वल्पपणं बुधैः। पायसं स्नेहपक्वञ्च यावकञ्चैव सक्तवः। पिण्याकञ्चैव तैलञ्च शूद्राद् ग्राह्यं द्विजातिभिः" कूर्मपु० ७त० भागे १६अ०। "कन्दुपक्वानि तैलेन पायसं दधिसक्तवः। द्विजैरेतानि भोज्यानि शूद्रगेहकृतान्यपि"। "कुलमित्रादीनां भोज्यान्नता तु कलीतत्परा। शूद्रेषु दासगोपालकुलमित्रार्द्धसीरिणाम्। भोज्यान्नता गृहस्थस्य तीर्थसेवाऽतिदूरतः" पराशरेण कलौ वर्ज्यत्वोक्तेः शूद्रोऽपि ब्राह्मणद्वारा पक्वान्नेन नैवेद्यं दातुमर्हति वृषोत्सर्गाङ्गचरुपाकादिवत् तत्रापि तस्याधिकार इति ति०त० दुर्गोत्सवप्रकरणे रघुनन्दनेन व्यवस्थापितम् तत्र दृश्यम्।

**शूद्रासुत** पु० शूद्रायाः द्विजातिभिः ऊढायाः सुतः। द्विजातिजाते शूद्रजातिस्त्रियाः सुते पुत्रभेदे।

**शूना** स्त्री श्वि–अधिकरणे–क्त सम्प्र०दीर्घः। १प्राणिवधस्थाने हला०। "पञ्च शूना गृहस्थस्य चुल्ली पेषण्युपस्करः। कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन्" मनुः। तद्दोषनिवृत्तये कार्य्या मनुना पञ्च यज्ञा विहिता यथा "अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्। होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्। पञ्चैतान् यो महायज्ञान् न हापयति शक्तितः। स गृहेऽपि वसन्नित्यं शूनादोषैर्न लिप्यते"। (आलजिभ) २अधोजिह्वायां हारा०।

**शून्य** त्रि० शूनायै प्राणिवधाय हितम् रहस्यस्थानत्वात् यत्। १निर्जनस्थाने मेदि०। २आकाशे शब्दच०। ३बिन्दुमात्रे हेमच०। ४अभावे च अमरः। ५असम्पूर्णे ६ऊने ७तुच्छे च त्रि० अमरः। [२शून्यमध्ययुक्ते त्रि०।